# viGYAnagaNarAjastotram

# વિજ્ઞાનગણરાજસ્તોત્રમ્

## Document Information

Text title : viGYaanagaNarAjastotram

File name : viGYaanagaNarAjastotram.itx

Category : ganesha, stotra

Location : doc_ganesha

Author : Traditional

Transliterated by : Karthik Chandan.P (kardan5380 at yahoo.com) : Amith K Nagaraj)

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : mudgalapurANa

Latest update : May 12, 2004, July 5, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 6, 2021

*sanskritdocuments.org*

# વિજ્ઞાનગણરાજસ્તોત્રમ્

શ્રી ગણેશાય નમઃ ।
અત્રિરુવાચ ।
શ઼ૃણુ પુત્ર પ્રવક્ષ્યામિ શાન્તિયોગં સનાતનમ્ ।
બ્રહ્મણા કથિતં હ્યેતદ્યેન શાન્તોઽહમઞ્જસા ॥ ૧॥

અસ્માકં કુલદેવત્વં પ્રાપ્તો ગણપતિઃપ્રભુઃ ।
સ વૈ દેવાધિદેવાનાં કુલદેવઃ પ્રકીર્તિતઃ ॥ ૨॥

શાન્તિયોગસ્વરૂપં તં જાનીહિ ત્વં મહામતે ।
ભજસ્વ સુપ્રયત્નેન તદા શાન્તિમવાપ્સ્યસિ ॥ ૩॥

ગણેશાત્સર્વમુત્પન્નં તેન સંસ્થાપિતં સુત ।
તસ્યારાધનમાત્રેણ કૃતકૃત્યાઃ શિવાદયઃ ॥ ૪॥

નામરૂપાત્મકં સર્વં જગદ્ બ્રહ્મ પ્રકથ્યતે ।
તદેવ શક્તિરૂપાખ્યં બ્રહ્માસદ્રૂપકં પરમ્ ॥ ૫॥

તત્રામૃતમયં ભાનુમાત્માકારેણ સંસ્થિતમ્ ।
સદ્રૂપં તં વિજાનીયાદ્ બ્રહ્મ વેદે પ્રકીર્તિતમ્ ॥ ૬॥

તયોરભેદતો બ્રહ્મ સમં સર્વત્ર સંસ્થિતમ્ ।
સદસન્મયગં વિષ્ણું જાનીહિ વેદવાદતઃ ॥ ૭॥

તેભ્યો વિલક્ષણસ્તુર્યા નેતિરૂપઃ પ્રકીર્તિતઃ ।
નિર્મોહઃ શિવસંજ્ઞશ્ચ સ્વાધીનં બ્રહ્મ તદ્બુધૈઃ ॥ ૮॥

ચતુર્ણાં બ્રહ્મસંયોગે સ્વાનન્દઃ કથ્યતે બુધૈઃ ।
સ વૈ માયામયઃ સાક્ષાદ્ગણેશો વેદવાદિભિઃ ॥ ૯॥

અન્તર્બાહ્યાઃ ક્રિયાઃ સર્વા બ્રહ્માકારઃ પ્રદૃશ્યતે ।
કર્મયોગઃ સ વિજ્ઞેયઃ સંયોગઃ કર્મણાં સુત ॥ ૧૦॥

જ્ઞાનાત્મચક્ષુષા જ્ઞાનં યદ્યદ્ભવતિ યોગિનામ્ ।
તેષામભેદકો યોગો જ્ઞાનયોગઃ પ્રકીર્તિતઃ ॥ ૧૧॥

જ્ઞાનાનાં કર્મણામ્ ચૈવ ભેદે યોગઃ સમાત્મકઃ ।
આનન્દાત્મકરૂપોઽયં દ્વૈધનાશે સ પ્રાપ્યતે ॥ ૧૨॥

સ્વેચ્છયા કર્મયોગશ્ચ ધૃતો યેન મહાત્મના ।
સ્વેચ્છયા જ્ઞાનયોગશ્ચ સ્વેચ્છયાનન્દયોગકઃ ॥ ૧૩॥

સ્વેચ્છયા સ ત્રિભિર્હિનઃ સહજાખ્યઃ પ્રકથ્યતે ।
સદા સ્વાધીનરૂપશ્ચ સ્વેચ્છયા ક્રીડતે સ્વયમ્ ॥ ૧૪॥

બ્રહ્મભૂતાત્મકો યોગઃ સ્વાનન્દાખ્યઃ પ્રકીર્તિતઃ ।
તત્ર સ્વાધીનતા પુત્ર પરાધીના ત્રિધા કૃતા ॥ ૧૫॥

બ્રહ્મણિ બ્રહ્મભૂતસ્ય સ્વતઃ પરત એવ ચ ।
ઉત્થાનં નાસ્તિ સંયોગાત્સ્વસ્વરૂપિણિ યોગિનઃ ॥ ૧૬॥

સ્વાનન્દે સુતસંયોગો જગતાં બ્રહ્મણાં ભવેત્ ।
સર્વાભેદેન યોગોઽયં તસ્માન્માયાસમન્વિતઃ ॥ ૧૭॥

અયોગાત્મકયોગશ્ચ સદા સંયોગવર્જિતઃ ।
જગતાં બ્રહ્મણાં તત્ર પ્રવેશોઽતો ન વિદ્યતે ॥ ૧૮॥

સદા નિર્માયિકો યોગઃ સ્વસંવેદ્યવિવર્જિતઃ ।
સ્વકીયાભેદહીનત્વાન્નિવૃત્તિર્યોગિભિર્ધૃતા ॥ ૧૯॥

બ્રહ્મ બ્રહ્માણિ સંસ્થં યન્નાગતં ન ગતં પુનઃ ।
સ્વાનન્દનાશતસ્તુભ્યં બ્રહ્મભૂતમયોગકમ્ ॥ ૨૦॥

બ્રહ્મસ્વાનન્દવાસી સ ગણેશઃ કથ્યતે બુધૈઃ ।
સ્વાનન્દાત્માત્મકઃ પ્રોક્તો વેદેષુ વેદવાદિભિઃ ॥ ૨૧॥

ક્રીડાત્મકો ગણેશાનઃ સ્વાનન્દઃ પરિકીર્તિતઃ ।
સંયોગાત્મકરૂપેણ સ્વસ્વરૂપેણ તિષ્ઠતિ ॥ ૨૨॥

ક્રીડાહીનો ગણેશાનો યોગરૂપઃ પ્રકીર્તિતઃ ।
નિરાનન્દાત્મકત્વેન સદા બ્રહ્મણિ સંસ્થિતઃ ॥ ૨૩॥

સંયોગાયોગયોગેન તયોર્નાશે ગણેશ્વરઃ ।
શાન્તિયોગાત્મકઃ પ્રોક્તો યોગિભિર્યોગસેવયા ॥ ૨૪॥

પૂર્ણયોગાત્મકસ્તત્ર ગણેશઃ પરિકીર્તિતઃ ।
માયાયુક્તવિહીનત્વં ભ્રાન્તિમાત્રં પ્રકીર્તિતમ્ ॥ ૨૫॥

પઞ્ચચિત્તસ્વરૂપાં ત્વં બુદ્ધિં જાનીહિ પુત્રક ।
તત્ર મોહકરી સિદ્ધિર્ભ્રાન્તિદા મોહરૂપિણી ॥ ૨૬॥

ધર્માર્થકામમોક્ષાણાં સિદ્ધિર્ભિન્ના પ્રદૃશ્યતે ।
બ્રહ્મભૂતમયી સિદ્ધિઃ કથિતા યોગિભિસ્તથા ॥ ૨૭॥

પઞ્ચધા ચિત્તવૃત્તિર્યા તત્ર યદ્બિમ્બિતં સુત ।
તદેવ ગણરાજસ્ય રૂપં બિમ્બાત્મકં પરમ્ ॥ ૨૮॥

ધર્માર્થકામમોક્ષેષુ બ્રહ્મભૂતેષુ યત્સ્મૃતમ્ ।
ઐશ્વર્યં મોહદં જન્તુર્ભ્રમતિ યત્ર લાલસઃ ॥ ૨૯॥

પઞ્ચૈશ્વર્યેષુ યદ્બિમ્બં તદેવ ગણપસ્ય ચ ।
જીવં જાનીહિ પુત્ર ત્વં શાન્તિયોગસ્ય સેવયા ॥ ૩૦॥

પઞ્ચચિત્તપ્રણાશે વૈ પઞ્ચૈશ્વર્યે લયં ગતઃ ।
અધુના ગણરાજસ્ત્વં ભવિતાઽસિ ન સંશયઃ ॥ ૩૧॥

ત્યજાવધૂતમાર્ગં ત્વં ભાવવધૂતમુખ્યકઃ ।
અવધૂય મહચ્ચિત્તં મહદૈશ્વર્યમાદરાત્ ॥ ૩૨॥

સદા શાન્તિં ભજસ્વ ત્વં યોગેન દત્ત સત્વરમ્ ।
દદામિ તે મહામન્ત્રં ગણેશસ્ય વિધાનતઃ ॥ ૩૩॥

તત એકાક્ષરં મન્ત્રં દદૌ પુત્રાય ભાવતઃ ।
અત્રિર્યોગવિદાં શ્રેષ્ઠસ્તં પ્રણમ્ય યયાવજઃ।૩૪ ।
સાક્ષાદ્વિષ્ણુસ્વરૂપશ્ચ દત્તો યોગવિદાંવરઃ ।
ગઙ્ગાયા દક્ષિણે તીરે પૂજયામાસ વિગ઼્ ્ત્રપમ્ ॥ ૩૫॥

ત્યક્ત્વા ભૂમિસ્વરૂપં સ શાન્તિમાસ્થાય યોગવિત્ ।
અભજત્તં તુ ભાવેન ગણપં હૃદિ ચિન્તયન્ ॥ ૩૬॥

મહાયોગી સ્વયં દત્તો વર્ષેણૈકેન શૌનક ।
શાન્તિં પ્રાપ્તો વિશેષેણ ગાણપત્યો બભૂવ હ ॥ ૩૭॥

તં દ્રષ્ટું ગણપસ્તત્ર યયૌ ભક્તં નિજેચ્છયા ।

ભક્તવાત્સલ્યભાવેન દત્તાશ્રમસુશાન્તિદઃ ॥ ૩૮॥

તં દૃષ્ટ્વા સહસોત્થાય પ્રણનામ કૃતાંજલિઃ ।
તુષ્ટાવ સુસ્થિરો ભૂત્વા વિઘ્નેશં કુલદૈવતમ્ ॥ ૩૯॥

દત્ત ઉવાચ ।
નમો ગણપતે તુભ્યં નમો યોગસ્વરૂપિણે ।
યોગિભ્યો યોગદાત્રે ચ શાન્તિયોગાત્મને નમઃ ॥ ૪૦॥

સિદ્ધિબુદ્ધિપતે તુભ્યં પઞ્ચચિત્તપ્રધારકમ્ ।
નાનાવિહારશીલાય ગણેશાય નમો નમઃ ॥ ૪૧॥

સિદ્ધિદાત્રે સમસ્તેભ્યો નાનૈશ્વર્યપ્રધારિણે ।
મોહહન્ત્રે મોહકર્ત્રે હેરમ્બાય નમો નમઃ ॥ ૪૨॥

સ્વાનન્દવાસિને તુભ્યં સંયોગાભેદધારિણે ।
નાનામાયાવિહારાય વિઘ્નેશાય નમો નમઃ ॥ ૪૩॥

સાંખ્યાય બ્રહ્મનિષ્ઠાય બોધહીનાય ધીમતે ।
પરતોત્થાનરૂપાય વિદેહાય નમો નમઃ ॥ ૪૪॥

બોધાય સર્વરૂપાય દેહદેહિમયાય ચ ।
સ્વત ઉત્થાનરૂપાય પ્રકૃતેર્લય તે નમઃ ॥ ૪૫॥

સોઽહઙ્કારાય દેવાય જગદીશાય તે નમઃ ।
મહતે બિન્દુરૂપાય જગદ્રૂપાય તે નમઃ ॥ ૪૬॥

નાદાત્મકગુણેશાય નાનાવેષપ્રધારિણે ।
બ્રહ્મણે સૃષ્ટિકર્ત્રે ચ પિતામહ નમોઽસ્તુ તે ॥ ૪૭॥

હરયે પાલકાયૈવ નાનાદેહધરાય ચ ।
સંહર્ત્રે શઙ્કરાયૈવ કર્માકારાય ભાનવે ॥ ૪૮॥

શક્તયે ચ ક્રિયામૂર્તે દેવમાનવરૂપિણે ।
નાગાસુરમયાયૈવ ઢુણ્ઢિરાજાય તે નમઃ ॥ ૪૯॥

સ્થાવરાય નમસ્તુભ્યં જઙ્ગમાય નમો નમઃ ।
જગદ્રૂપાય દેવાય બ્રહ્મણે તે નમો નમઃ ॥ ૫૦॥

કિં સ્તૌમિ ત્વાં ગણાધીશ યોગાકારેણ સંસ્થિતમ્ ।
વેદાદયઃ સમર્થા ન ત્વામતઃ પ્રણમામ્યહમ્ ॥ ૫૧॥

ધન્યો દેહો મદીયોઽદ્ય પિતરૌ કુલમેવ ચ ।
વિદ્યા યોગસ્તપશ્ચૈવ ત્વદંઙ્ઘ્રિયુગદર્શનાત્ ॥ ૫૨॥

ઇત્યુક્ત્વા ભક્તિભાવેન પરિપ્લુતો મહામુનિઃ ।
નનર્ત હૃષ્ટરોમાઽસૌ આનન્દાશ્રૂઃ સૃજન્મુહુઃ ॥ ૫૩॥

તતસ્તં સ્વકરે ધૃત્વા ગણનાથઃ પ્રસસ્વજે ।
ઉવાચ યોગિનં પૂર્ણૈર્વચનં પરમાદ્ભુતમ્ ॥ ૫૪॥

ગણેશ ઉવાચ ।
ધન્યોઽસિ દત્ત યોગીન્દ્રો જાતોઽસિ મદનુગ્રહાત્ ।
શાન્તિં લભસિ પૂર્ણાં ત્વમચલાં મયિ સર્વદા ॥ ૫૫॥

કદાપિ તે ન ભેદો મે ભવિષ્યતિ મહામુને ।
ત્વત્પ્રીતિસમ્પ્રવૃદ્ધ્યર્થમત્ર સ્થાસ્યામિ નિશ્ચલઃ ॥ ૫૬॥

ગણેશજ્ઞાનમાહાત્મ્યં ત્વયા હ્યત્રેર્મુખાચ્છ્રુતમ્ ।
સાક્ષાત્કારકૃતં તસ્માદિદં વિજ્ઞાનક્ષેત્રકમ્ ॥ ૫૭॥

વિજ્ઞાનગણપો દત્તનામ્ના ખ્યાતો ભવામ્યહમ્ ।
દર્શનાચ્છાન્તિસન્દાતા ભવિષ્યામ્યત્ર માનદ ॥ ૫૮॥

અત્ર વાસં પ્રકુર્વન્તિ મદર્થં ભક્તિસંયુતાઃ ।
શાન્તિયોગં સદા તેભ્યો દાસ્યામિ તે સ્વસન્નિધૌ ॥ ૫૯॥

ઇદં પુરા શિવેનૈવ જ્ઞાનં સાક્ષાત્કૃતં સ્વયમ્ ।
વિજ્ઞાનેશ્વરનામા મે કૃતો મયા સ શઙ્કરઃ ॥ ૬૦॥

તસ્યાત્ર સન્નિધિં સ્થિત્વા ત્વયા તથા સુસાધિતમ્ ।
અતઃ શઙ્કરમિત્રત્વં પ્રાપ્તોઽસિ મદનુગ્રહાત્ ॥ ૬૧॥

ત્વયા કૃતમિદં સ્તોત્રં યોગશાન્તિપ્રદં ભવેત્ ।
પઠતાં શૃણ્વતાં નૃણાં બ્રહ્મીભૂતકરં તથા ॥ ૬૨॥

ધર્માર્થકામમોક્ષાણાં દાયકં પ્રભવિષ્યતિ ।
સર્વસિદ્ધિપ્રદં ચૈવ સર્વેભ્યો જ્ઞાનદાયકમ્ ॥ ૬૩॥

ઇત્યુક્ત્વાઽન્તર્દધે તત્ર ગણેશો ભક્તવત્સલઃ ।
દત્તઃ ખિન્નશ્ચ તં ધ્યાત્વા તસ્થૌ તત્ર પ્રજાપતે ॥ ૬૪॥

તતસ્તત્કૃપયા તેન સ્વાત્મા તત્ર સમર્પિતઃ ।
યોગાભેદમયત્વેન જાત આત્મનિવેદકઃ ॥ ૬૫॥

દત્તો ભક્તો ગણેશશ્ચ સ્વામી તસ્યેતિ નાશિતમ્ ।
સ્વામિનિ સેવકઃ સોઽપિ તદાકારેણ સંસ્થિતઃ ॥ ૬૬॥

ઇયં ભક્તિર્ગણેશસ્યાત્મનિવેદનરૂપિણી ।
દત્તેન સા ધૃતા મુખ્યા શાન્તિયોગમયત્વતઃ ॥ ૬૭॥

એતસ્મિન્નન્તરે તત્ર પ્રકટોઽભૂત્સ્વયં શિવઃ ।
વિજ્ઞાનેશ્વરનામાસૌ દત્તં તં પરિષસ્વજે ॥ ૬૮॥

અહો દત્ત મહાભાગ મમ મિત્રત્વમાગતઃ ।
અત્રૈવાહં ગણેશાનં ધ્યાયામિ યોગસેવયા ॥ ૬૯॥

તતો દત્તં પુરસ્કૃત્ય શઙ્કરો બ્રાહ્મણૈઃ સહ ।
ગણેશં સ્થાપયામાસ ગઙ્ગાયા દક્ષિણે તટે ॥ ૭૦॥

વિજ્ઞાનગણરાજેતિ નામ ચક્રે મહર્ષિભિઃ ।
તદાદિક્ષેત્રવિખ્યાતં બભૂવ ગણપસ્ય તત્ ॥ ૭૧॥

વિજ્ઞાનનામકં પુણ્યં શાન્તિયોગફલપ્રદમ્ ।
સર્વસિદ્ધિકરં ક્ષેત્રં યાત્રાકારિ જનસ્ય ચ ॥ ૭૨॥

ઇતિ મુદ્ગલપુરાણોક્તં વિજ્ઞાનગણરાજસ્તોત્રં સમાપ્તમ્ ।

Encoded by Karthik Chandan.P (kardan5380@yahoo.com)
and Amith K Nagaraj (amithkn@rediffmail.com)
Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*viGYAnagaNarAjastotram*
pdf was typeset on July 6, 2021

Please send corrections to *sanskrit@cheerful.com*